# ॥ શ્રીકમલાષ્ટોત્તરશતનામસ્તોત્રમ્ ॥

.. shrIkamalAShTottarashatanAmastotram ..

sanskritdocuments.org

August 20, 2017

# .. shrIkamalAShTottarashatanAmastotram ..

# ॥ શ્રીકમલાષ્ટોત્તરશતનામસ્તોત્રમ્ ॥

## Sanskrit Document Information

Text title : kamalAShTottarashatanAmastotram

File name : kamalAShTottarashatanAmastotram.itx

Category : aShTottarashatanAma, devii

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Shree Devi Kumar

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Acknowledge-Permission: Mahaperiaval Trust

Latest update : July 2, 2017

Send corrections to : sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ શ્રીકમલાષ્ટોત્તરશતનામસ્તોત્રમ્ ॥

શ્રીશિવ ઉવાચ
શતમષ્ટોત્તરં નામ્નાં કમલાયા વરાનને ।
પ્રવક્ષ્યામ્યતિગુહ્યં હિ ન કદાપિ પ્રકાશયેત્ ॥ ૧॥

મહામાયા મહાલક્ષ્મીર્મહાવાણી મહેશ્વરી ।
મહાદેવી મહારાત્રિર્મહિષાસુરમર્દિની ॥ ૨॥

કાલરાત્રિઃ કુહૂઃ પૂર્ણા નન્દાઽઽદ્યા ભદ્રિકા નિશા ।
જયા રિક્તા મહાશક્તિર્દેવમાતા કૃશોદરી ॥ ૩॥

શચીન્દ્રાણી શક્રનુતા શઙ્કરપ્રિયવલ્લભા ।
મહાવરાહજનની મદનોન્મથિની મહી ॥ ૪॥

વૈકુણ્ઠનાથરમણી વિષ્ણુવક્ષઃસ્થલસ્થિતા ।
વિશ્વેશ્વરી વિશ્વમાતા વરદાઽભયદા શિવા ॥ ૫॥

શૂલિની ચક્રિણી મા ચ પાશિની શઙ્ખધારિણી ।
ગદિની મુણ્ડમાલા ચ કમલા કરુણાલયા ॥ ૬॥

પદ્માક્ષધારિણી હ્યમ્બા મહાવિષ્ણુપ્રિયઙ્કરી ।
ગોલોકનાથરમણી ગોલોકેશ્વરપૂજિતા ॥ ૭॥

ગયા ગઙ્ગા ચ યમુના ગોમતી ગરુડાસના ।
ગણ્ડકી સરયૂસ્તાપી રેવા ચૈવ પયસ્વિની ॥ ૮॥

નર્મદા ચૈવ કાવેરી કેદારસ્થલવાસિની ।
કિશોરી કેશવનુતા મહેન્દ્રપરિવન્દિતા ॥ ૯॥

બ્રહ્માદિદેવનિર્માણકારિણી વેદપૂજિતા ।
કોટિબ્રહ્માણ્ડમધ્યસ્થા કોટિબ્રહ્માણ્ડકારિણી ॥ ૧૦॥

શ્રુતિરૂપા શ્રુતિકરી શ્રુતિસ્મૃતિપરાયણા ।
ઇન્દિરા સિન્ધુતનયા માતઙ્ગી લોકમાતૃકા ॥ ૧૧॥

ત્રિલોકજનની તન્ત્રા તન્ત્રમન્ત્રસ્વરૂપિણી ।
તરુણી ચ તમોહન્ત્રી મઙ્ગલા મઙ્ગલાયના ॥ ૧૨॥

મધુકૈટભમથની શુમ્ભાસુરવિનાશિની ।
નિશુમ્ભાદિ હરા માતા હરિશઙ્કરપૂજિતા ॥ ૧૩॥

સર્વદેવમયી સર્વા શરણાગતપાલિની ।
શરણ્યા શમ્ભુવનિતા સિન્ધુતીરનિવાસિની ॥ ૧૪॥

ગન્ધર્વગાનરસિકા ગીતા ગોવિન્દવલ્લભા ।
ત્રૈલોક્યપાલિની તત્ત્વરૂપા તારુણ્યપૂરિતા ॥ ૧૫॥

ચન્દ્રાવલી ચન્દ્રમુખી ચન્દ્રિકા ચન્દ્રપૂજિતા ।
ચન્દ્રા શશાઙ્કભગિની ગીતવાદ્યપરાયણા ॥ ૧૬॥

સૃષ્ટિરૂપા સૃષ્ટિકરી સૃષ્ટિસંહારકારિણી ।
ઇતિ તે કથિતં દેવિ રમાનામશતાષ્ટકમ્ ॥ ૧૭॥

ત્રિસન્ધ્યં પ્રયતો ભૂત્વા પઠેદેતત્સમાહિતઃ ।
યં યં કામયતે કામં તં તં પ્રાપ્નોત્યસંશયમ્ ॥ ૧૮॥

ઇમં સ્તવં યઃ પઠતીહ મર્ત્યો વૈકુણ્ઠપત્ન્યાઃ પરસાદરેણ ।
ધનાધિપાદ્યૈઃ પરિવન્દિતઃ સ્યાત્ પ્રયાસ્યતિ શ્રીપદમન્તકાલે ॥ ૧૯॥

ઇતિ શ્રીકમલાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. shrIkamalAShTottarashatanAmastotram ..
Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*